विक्रमो यस्य, अमितः विक्रमः शौर्य्यमस्येति वा । विष्णौ ।
"सुक्रान्दोऽमितविक्रमः" वि०स० । बहुशौर्य्ये त्रि० ।

**अमिताशन** पु० अमितमश्नाति संहारसमये अश–ल्यु । सर्व-भक्षके परमेश्वरे । "यस्य ब्रह्म च क्षत्रञ्च उभे भवत ओदनं मृत्युर्यस्योपसेचनम्" इति श्रुतेः 'अत्ता चराचरग्रहणात्' इति शा० सूत्राच्च तस्य सर्वभक्षकत्वम् । २ विष्णौ च "वेगवानमिताशनः" विष्णुस० ।

**अमितौजस्** त्रि० अमितमोजो यस्य । अपरिच्छिन्नसामर्थ्ये प्रचुरबले । "कविरमितौजा अजायत" ऋ० १,११,४ । "स तैः पृष्टस्तथा सम्यगमितौजा महात्मभिः" मनुः ।

**अमित्र** अम० रोगे इत्र । रिपौ । "स्यातामित्रौ मित्रे च सहजप्राकृतावपि" तस्य मित्रायमित्रामित्रास्ते" इति च माघः 'अमित्रजिन्मित्रजिदोजसा स यद्' इति" नैष० "अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनम्" मनुः ।

**अमित्रस(षा)ह** त्रि० अमित्रं सहते बलाधिक्यात् अच् अण् वा । रिपुजयशीले बलिनि "शासइत्था महाँ अस्यमित्रषाहः" । अथ० १,२०,४ । [तस्ते प्रियमप्यमिथ्या" रघुः ।

**अमिथ्या** अव्य० विरोधे न०त० । मिथ्याभिन्ने सत्ये "तामूच-

**अमिन्** त्रि० चु० अम–रोगे ह्रस्वः इनि । रोगिणि ।

**अमिन** त्रि० मि–क्षेपे बा० कर्मणि नङ् न०त० । अक्षेपणीये अहिंस्ये "उत द्विबर्हा अमिनः सहोभिः" ऋ० ६,१९,१ । "अमिनः अहिंसनीयः" भा० ।

**अमिश्र** त्रि० न०त० । संकीर्णभिन्ने पृथगभूते । "तद्वा अमिश्रमेव वसूनां प्रातः सवनम्" शत०ब्रा० ।

**अमिश्रित** त्रि० न०त० । मिश्रितभिन्ने पृथगभूते ।

**अमिष** न० अम–भोगे कर्मणि इषन् । १लौकिकसुखे नास्ति मिषम्छलं यत्र । २व्याजशून्ये त्रि० ।

**अमीत** त्रि० मी–बधे कर्मणि क्त न०त० । अहिंसिते । "अमीतवर्णा उषसश्चरन्ति" ऋ० ४,५१,९, "अमीतवर्णा अहिंसितवर्णाः" भा० ।

**अमीव** त्रि० अम–वन् नि० ईडागमः । १रोगे "सनेम्यस्मद्युयवन्नमीवाः य०" ९,१६ । अमीवाः व्याधीन् सुपांसु वे०दी० । "अपामीवं बाधते वेति" ऋ० १,३५,९ "अमीवां रोगादिबाधाम्" भा० "प्रजावन्तोऽनमीवा अनागमः" ऋ० १०,३७,७ 'अनमीवा रोगरहिताः" भा० । "अमीवहा वास्तोष्पते" । ऋ० ७,५५,१ "अमीवं रोगं हन्ति अमीवानां रोगाणां नाशयिता" भा० । २पापे, ३ दुःखे, च न० । उज्ज्वलदत्तस्तु मीञ् हिंसायां वन् मीवः उदरक्रमिरित्येवंनिपातः न तु अमीवः इत्याह ।

**अमीवचातन** त्रि० अमीवं रोगं चातयति चत–याचने णिच्–ल्यु । रोगहिंसके "देवममीवचातनम्" ऋ० १,१२,७ अमीवानां हिंसकानां शत्रूणां रोगाणां वा चातनं घातकम्" भा० स्त्रियां गौ० ङीष् । आप इद्वा उ भेषजीरापो अमीवचातनीः" ऋ० १०,१३७,६ ।

**अमुक** त्रि० अदस्+टेरकच् उत्त्वमत्वे । अदःशब्दार्थे "अत्राहममुकः साक्षी" "समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत् मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितम्" च या०

**अमुक्त** त्रि० न मुक्तः विरोधे न०त० । मुक्तभिन्ने १ बद्धे "सदा प्रहृष्टया भाव्यं व्यये चामुक्तहस्तया" मनुः । २सस्संसारबन्धयुक्ते च न मुच्यते सर्व्वदा योधैः (छातछुरी)। ३छुरिकाभेदे न०

**अमुक्ति** स्त्री अभावे न०त० । १मुक्त्यभावे मुक्तिर्मोचनं रज्ज्वादिबन्धननिवृत्तिः संसारबन्धनिवृत्तिरूपो मोक्षश्च । न०ब० २मुक्तिशून्ये त्रि० । [गौणे ।

**अमुख्य** त्रि० मुख्यम् विरोधे न०त० । मुख्यभिन्ने प्रधानभिन्ने

**अमुग्ध** त्रि० न मुग्धः १ मुग्धभिन्ने । मुग्धः मोहान्वितः मनोहरश्च । २मुग्धावस्थातीतप्रौढायां स्त्रियां स्त्री ।

**अमुतस्** अव्य० अमुष्मात् अदस्+तसिल् उत्त्वमत्वे । १ अमुष्मादित्यर्थे २ परलोकादित्यर्थे च "इतआजातोऽमुतः कुतश्चित् ऋ० १, १७९ ४ ।

**अमुत्र** अव्य० अमुष्मिन् अदस् त्रल् उत्त्वमत्वे । १ अमुष्मिन्नित्यर्थे २ परलोके इत्यर्थे च "यत्तु वाणिजके दत्तं नेह नामुत्र तद्भवेत्" मनुः । ["अमुत्रभूयादथ यद्यमस्य" श्रुतिः ।

**अमुत्रभूय** न० अमुत्र भवनम् भू–भावे क्यप् । परलोकभवने

**अमुथा** अव्य० अमुना प्रकारेण थाल् । अमुनाप्रकारेणेत्यर्थे "इत्थं नःसद्योऽमुथासद्योः न एतदतिक्रामादिति" शत०ब्रा० ।

**अमुद्र्यञ्च्(च्)** त्रि० अमुमञ्चति अदस्+अन्च क्विप् अद्र्यागमः उत्त्वमत्वे । १अदःशब्दार्थप्राप्ते २तत्पूजके च । शसादौ अमुद्रीचः । पूजार्थे अमुद्र्यञ्चः । स्त्रियां ङीप् ।

**अमुमुयञ्च्(च्** त्रि० अमुमञ्चति अदस् अन्च–क्विप् गतौ न लोपः अद्र्यादेशः अद्रेरपि उत्त्वमत्वे । १अदः शब्दार्थं गते तत्पूजके च शसादौ अमुमुईचः अमुमुञ्चः स्त्रियां ङीप् ।

**अमु(दो)वत्** अव्य० अमुष्येव वति वेदे उत्त्वमत्वे । अमुष्येवेत्यर्थे "मनुष्वदग्नेतवदमुवदिति यजमानार्षं याम्याह" कात्या० ३,२,७ ।

**अमुष्यकुल** न० ६त० नि० अलुक् । प्रसिद्धकुले । मनोज्ञा० वुञ् आमुष्यकुलकम् तद्भावे कौलीन्ये न० ।